**UG/I/SANS/H/II/18**

# 2018

## SANSKRIT

## [ Honours ]

## PAPER – II

*Full Marks* : 90

*Time* : 4 hours

*The figures in the right hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

1. स्वप्नवासवदत्तमिति नाटकस्य नामकरणस्य तात्पर्यं निरूप्यताम् । 10

*अथवा*

वासवदत्ता-चरित्रस्य पद्मावती चरित्रस्य च सादृश्य-वैसादृश्यौ सम्यग्रूपेण आलोच्येताम् ।

( *Turn Over* )

2. अधोलिखितयोः श्लोकयोरेकतरं सुरगिरा देवनागर्या च व्याख्येयम्— 8

(*a*) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम् ।।

(*b*) गुणानां वा विशालानां सत्काराणां च नित्यशः ।
कर्त्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः ।।

3. अधोलिखितेषु प्रश्नषट्कं सुरगिरा देवनागर्या च समाधेयम्— $1 \times 6$

(*a*) पद्मावती किमर्थं तपोवनं समागता ?

(*b*) क आसीद् वासवदत्तायाः पिता ?

(*c*) स्वप्नवासवदत्तमिति नाटके विदूषकः केन नाम्ना व्यपदिश्यते ?

(*d*) पद्मावत्याः परिचारिकाया नाम किमासीत् ?

(*e*) 'स्त्री-स्वभावस्तु कातरः'—कस्य उक्तिरियम् ?

(*f*) आवन्तिकायाः परिचयः प्रदीयताम् ।

4. अधोलिखितानां त्रयाणां प्रकृति-प्रत्ययौ निर्णेयौ:— $2 \times 3$

दातुम्, रक्षणम्, समुद्धृताः, सत्काराणाम्, अपवादः ।

5. अभिज्ञानशकुन्तलमाश्रित्य शकुन्तलायाः चरित्रचित्रणं कुरु । 12

*अथवा*

का आसीत् हंसपदिका ? किं संगीतं तया परिवेशितम् ? अस्य तात्पर्यं निरूप्यताम् । 2 + 3 + 7

6. निम्नलिखितेषुः पद्यमेकं सुरगिरा व्याख्येयम् (देवनागर्या लिख्यताम्) — 8

(*a*) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम् ॥

(*b*) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः ।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ॥

(*c*) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥

7. अधस्तनेषु एकतरस्य सुरगिरा भावसंप्रसारणं कार्यम् (देवनागर्या उत्तरं लिख्यताम् ) — 4

(*a*) बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेत : ।

(*b*) सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः ।

8. निम्नलिखितेषु प्रश्नेषु द्वादशानामुत्तरं प्रदीयताम् (सुरगिरा देवनागर्या चोत्तरं लिख्यताम् ) — 1 × 12

(*a*) अभिज्ञानशाकुन्तलमिति नाटकस्य मङ्गलाचरणे कस्य वृत्तस्य प्रयोगो दृश्यते ?

(*b*) कस्य नाम माधव्यः आसीत् ?

(*c*) कौ आस्ताम् शकुन्तलायाः पितरौ ?

(*d*) 'को नामोष्णोदकेन नवमालिकां सिञ्चति' — कस्या उक्तिरियम्' ?

(*e*) अभिज्ञानशकुन्तलमिति नाटकस्य उत्सः कः ?

(*f*) को नाम गान्धर्वविवाहः ?

(*g*) अभिज्ञानशकुन्तलमिति पदस्य विग्रहवाक्यं लिख्यताम् ।

(*h*) 'अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र' — कस्य उक्तिरियम् ?

(*i*) अभिज्ञानशकुन्तलमिति नाटके मुख्यरसः कः ?

(*j*) असाधुदर्शी खलु तत्रभवान् काश्यपः--अत्र वक्ता कः ?

(*k*) दुष्यन्तस्य पुत्रस्य नाम किमासीत् ?

(*l*) कः त्रिशङ्कुः ?

(*m*) अभिज्ञानाङ्गुरीयकं शकुन्तलाया हस्तात् कुत्र भ्रष्टम् ?

(*n*) का वेत्रवती ?

(*o*) भरतस्य परिचयः कुत्र विद्यते ?

9. अधोलिखितानां चतुर्णां प्राकृतपदानां संस्कृतरूपं लिख्यताम्:-- 4

अज्जउत्तो, अणसूए, भमरेहिं, अवच्छायासु, तदो, अहिणवमहुलोलुवो, सउन्दला ।

10. अर्थोपक्षेपकस्य भेदा आलोच्यन्ताम् । 10

*अथवा*

महाकाव्यस्य वैशिष्ट्यं सोदाहरणं साहित्यदर्पणानुसारेण आलोच्यताम् ।

**11.** विषयमेकमाश्रित्य टीका विरचनीया: — 5

नान्दी, विष्कम्भकः, आरभटीवृत्तिः ।

**12.** अधोलिखितेषु पञ्च प्रश्नाः समाधेयाः (सुरगिरा देवनागर्या च उत्तरं लेख्यम् ) — 1 × 5

(*a*) सूत्रधारस्य लक्षणं किम् ?

(*b*) रसाः कतिविधाः ?

(*c*) दिव्यादिव्य नायकस्य उदाहरणं दीयताम् ।

(*d*) किं नाम आकाशभाषितम् ?

(*e*) प्रहसनस्य किमुदाहरणम् ?

(*f*) रूपकाणि कतिविधानि ?

(*g*) अर्थप्रकृतयः कतिविधाः ?

---